# द्वादशः पाठः

# त्वम् आपणं गच्छ

0672CH12



**अम्बा** – राकेश ! कुत्र असि ? अत्र आगच्छ ।

**राकेशः** – आम् अम्ब ! कथय किं कार्यं करवाणि ?

**अम्बा** – अद्य तव तातः कार्यालयात् विलम्बेन आगमिष्यति ।
त्वम् आपणं गच्छ । वस्तूनि आनय ।
वस्तूनां नामावली अपि अत्र अस्ति ।

**राकेशः** – अस्तु । स्यूतं ददातु । वस्तूनां नामावलीम्
अहं स्वीकरोमि ।

**अम्बा** – स्वीकुरु । धनम् अपि नय ।

**राकेशः** – अम्ब! इतोऽपि एकं वस्तु स्वीकरवाणि ?

**अम्बा** – चाकलेहम् इच्छति खलु वत्स ! जानातु, अधिकं चाकलेह-खादनं
स्वास्थ्याय हानिकरं भवति ।

**राकेशः** – केवलम् अद्य एव स्वीकरोमि ।

**अम्बा** – अस्तु । मार्गे यानानां गतिं पश्यतु । अनन्तरं सावधानं पारं गच्छतु ।

**राकेशः** – आम् । अहं गच्छामि ।



राकेशः विपणिं गच्छति

© NCERT not to be republished

राकेशः – महोदय! कृपया एतां नामावलीं पश्यतु, वस्तूनि च ददातु।

आपणिकः – पश्यामि।

मुद्गः – अर्धकिलोमितः
गुडः – एककिलोमितः
सर्षपः – पादकिलोमितः
शर्करा – एककिलोमिता
द्विदलम् – एककिलोमितम्

सर्वं सिद्धम् अस्ति। स्यूतं ददातु, तत्र स्थापयामि।

राकेशः – अस्तु, कति रूप्यकाणि यच्छानि?

आपणिकः – चत्वारि शतानि षष्टिं (४६०) च रूप्यकाणि ददातु।

राकेशः – महोदय! नीलवर्णा लेखनी अस्ति किम्?

आपणिकः – आम्, अस्ति।

राकेशः – एकं चाकलेहम् एकां लेखनीं च ददातु। तस्य मूल्यम् अपि योजयतु।

आपणिकः – अस्तु। लेखन्याः विंशतिं रूप्यकाणि चाकलेहस्य दश रूप्यकाणि च योजयामि। आहत्य नवत्यधिकानि चत्वारि शतानि (४९०) रूप्यकाणि ददातु।

राकेशः – आम्, पञ्च शतानि (५००) रुप्यकाणि सन्ति। स्वीकरोतु, अवशिष्टं च ददातु।

आपणिकः – सर्वं स्यूते स्थापितम् अस्ति। दश (१०) रुप्यकाणि अवशिष्टानि, स्वीकरोतु।

राकेशः – अस्तु। धन्यवादः।

आपणिकः – पुनरपि आगच्छतु।






Reprint 2025-26



## पठन्तु अवगच्छन्तु



भवान् पिबतु।



यूयम् उत्तिष्ठत।



भवन्तः खादन्तु।



अहं संशयं पृच्छानि।



त्वं पठ।



वयं गच्छाम।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| स्यूतम् | प्रसेवम् | थैला | Bag | |
| नामावली | नामसूचिः | सूची | List | |
| आपणम् | वस्तु-विक्रय-केन्द्रम् | बाजार को | Market | |
| आनय | आहर | लाओ | (You) Bring | |

© NCERT not to be republished



Reprint 2025-26

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| नय | गृहाण | ले जाओ | (You) Take away | |
| चाकलेहः | चाकलेहः | चॉकलेट | Chocolate | |
| यानानाम् | वाहनानाम् | गाड़ियों की | Of vehicles | |
| गतिम् | गमनम् | चलना | Movement | |
| मुद्गः | धान्यविशेषः | मूँग | Green Gram | |
| शर्करा | सिता | चीनी | Sugar | |
| गुडः | इक्षुसारः | गुड़ | Jaggery | |
| द्विदलम् | द्विदलम् | दाल | Pulses | |
| सर्षपः | सर्षपः | सरसों | Mustard seeds | |
| अवशिष्टम् | शेषभागः | बाकी | Remaining | |
| विपणिम् | आपण-वीथिम् | बाज़ार | Market | |

अत्र स्थूलाक्षरैः लिखितानि पदानि पश्यन्तु।

एतानि क्रियापदानि लोट्लकारे आज्ञा / प्रार्थना इति अर्थयोः सन्ति।

लोट्लकारः क्रियायाः भावसूचकः (Mood) भवति।

तस्य रूपाणि पश्यन्तु—

**पठ् - धातुः (लोट्लकारः)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |

© NCERT not to be republished



Reprint 2025-26

## वयम् अभ्यासं कुर्मः

१. पूर्वपृष्ठस्य कोष्ठके दत्तानि रूपाणि दृष्ट्वा रिक्तस्थानानि पूरयन्तु—

| | | |
|---|---|---|
| लिखतु | लिखताम् | .......................... |
| .......................... | लिखतम् | लिखत |
| लिखानि | लिखाव | .......................... |

| | | |
|---|---|---|
| .......................... | क्रीडताम् | .......................... |
| .......................... | क्रीडतम् | .......................... |
| क्रीडानि | क्रीडाव | क्रीडाम |

२. निम्नलिखितेषु सुभाषितेषु लोट्लकारस्य क्रियापदानि चित्वा लिखन्तु—

(क) **कालो वर्षतु पर्जन्यः पृथिवी सस्यशालिनी।**
**देशोऽयं क्षोभरहितः सज्जनाः सन्तु निर्भयाः॥**

.................................... ....................................

मेघाः उचिते समये वर्षन्तु। तेन भूमिः सस्यैः समृद्धा पूर्णा च भवतु।
एषः देशः शान्तः भवतु। सर्वे सज्जनाः भयं विना जीवनं यापयन्तु।
(एवं परमेश्वरं प्रति प्रार्थना अस्ति।)

(ख) **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥**

................................ ................................ ................................

सर्वे जनाः सुखेन तिष्ठन्तु। सर्वे नीरोगाः भवन्तु। सर्वे शुभम् एव पश्यन्तु।
कस्यापि कृते दुःखस्य अनुभवः न भवतु।



© NCERT not to be republished
Reprint 2025-26

(ग) **इमा आपः शिवाः सन्तु शुभाः स्वच्छाश्च निर्मलाः।**
**पावनाः शीतलाः सन्तु पूताः सूर्यस्य रश्मिभिः ॥**

.................................... ....................................

जलं सर्वेषां कृते मङ्गलमयं मालिन्यरहितं शुद्धं च भवतु। जलं पवित्रं शीतलं च भवतु। जलं सूर्यस्य प्रकाशस्य स्पर्शेन पवित्रं भवतु।

(घ) **निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु**
**लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।**
**अद्यैव वा मरणमस्तु युगान्तरे वा**
**न्याय्यात् पथः प्रविचलन्ति पदं न धीराः॥**

................................ ................................ ................................

................................ ................................

नीतिकाराः प्रशंसन्तु अथवा निन्दां कुर्वन्तु। धनस्य लाभः भवतु अथवा धनहानिः भवतु। मरणं झटिति भवतु अथवा विलम्बेन भवतु। न्याय्यात् मार्गात् धीराः न विचलन्ति तत्रैव ते स्थिररूपेण तिष्ठन्ति।

३. उदाहरणानुगुणं लोट्लकारस्य रूपाणि लिखन्तु—

| | | | | | |
|---|---|---|---|---|---|
| पठति | – | पठतु | खादति | – | ............................ |
| क्रीडामि | – | ............................ | पश्यसि | – | ............................ |
| हसति | – | ............................ | नयसि | – | ............................ |
| नृत्यति | – | ............................ | गच्छामि | – | ............................ |

४. उदाहरणानुगुणं बहुवचनस्य रूपाणि लिखन्तु—

| | | | | | |
|---|---|---|---|---|---|
| उत्तिष्ठतु | – | उत्तिष्ठन्तु | खादतु | – | ............................ |
| आगच्छतु | – | ............................ | पठतु | – | ............................ |
| उपविशतु | – | ............................ | पततु | – | ............................ |
| गच्छतु | – | ............................ | | | |



© NCERT not to be republished
Reprint 2025-26

५. **विद्यालयस्य वार्षिकोत्सवे के-के किं-किं कुर्वन्ति इति सूचनारूपेण वाक्यानि पुनः लिखन्तु—**

**यथा** – दशमकक्षायाः छात्राः वेदिकाम् अलङ्कुर्वन्ति।

दशमकक्षायाः छात्राः वेदिकाम् अलङ्कुर्वन्तु।



(क) प्रधानाध्यापकः वार्षिकं विवरणं पठति।

(ख) बालिकाः नृत्यन्ति।

(ग) यूयम् आसन्दान् स्थापयथ।

(घ) छात्रनायकः स्वागतं करोति।

(ङ) मम मित्रं धन्यवादं निवेदयति।

(च) संस्कृत-शिक्षिका वेदिकां सञ्चालयति।

(छ) कार्यक्रमानन्तरं छात्राः उत्थाय राष्ट्रगीतं गायन्ति।

६. **पट्टिकातः उचितैः क्रियारूपैः अनुच्छेदस्य रिक्तस्थानानि पूरयन्तु—**

| | | | | | | |
|---|---|---|---|---|---|---|
| शृण्वन्तु | गच्छन्तु | लिखन्तु | पठन्तु | पृच्छन्तु | कुर्वन्तु | वदन्तु |
| उत्तिष्ठन्तु | उपविशन्तु | अभिवादयन्तु | | | | |

यदा अध्यापकः कक्षाम् आगच्छति तदा प्रथमं सर्वे ..............................। उपचारवाक्येन तम् ......................। यदा सः वदति तदा एव सर्वे ......................। तस्य सूचनानुसारं पाठं ......................। गृहपाठं ......................। परस्परं वार्तालापं न ......................। प्रश्नस्य उत्तरं ......................। संशयं ......................। तस्य उपदेशम् ......................। बहिः मा ......................।

७. **मार्गे सूचनादीपाः फलकानि च भवन्ति। तेषां चित्राणि दृष्ट्वा पट्टिकापदैः वाक्यानि रिक्तस्थानेषु लिखन्तु—**

| | | | |
|---|---|---|---|
| तिष्ठ | प्रतीक्षस्व | वामतः गच्छ | दक्षिणतः गच्छ |
| यानं मा स्थापय | पदयात्रिकाः! | गच्छ | अग्रे विद्यालयः |



..............................



..............................



..............................



..............................

© NCERT not to be republished



Reprint 2025-26



..........

..........

..........



..........

८. **उदाहरणानुसारं क्रियापदस्य लोट्-लकाररूपैः वाक्यानि पूरयन्तु —**

**यथा** – छात्राः प्रातः शीघ्रम् ...उत्तिष्ठन्तु।... (उत् + तिष्ठ्)

(क) अम्ब! अहं क्रीडार्थं .......... (गच्छ्)

(ख) आगच्छन्तु, वयं प्रार्थनागीतं .......... (गाय्)

(ग) ज्वरः अस्ति। पुत्र! वृष्टौ न .......... (क्रीड्)

(घ) लते! भवती मम उपनेत्रम् .......... (आ + नय्)

(ङ) आर्ये! अहम् अन्तः .......... (प्रविश्)

(च) अहं पृच्छामि त्वम् उत्तरं .......... (वद्)

(छ) यूयं शीघ्रं नगरम् .......... (आ + गच्छ्)

(ज) तात! वयं कदा चलचित्रं .......... (पश्य्)

९. **चिह्नानि ( ? ! । , ) भावानुसारं वाक्ये योजयन्तु —**

**यथा** – राकेश! कुत्र असि? अत्र आगच्छ।

(क) पुत्र किं करोषि

(ख) कः श्लोकं वदति

(ग) भवान् तत्र तिष्ठतु

(घ) आचार्यः कदा आगच्छति

(ङ) अहो रमणीयः पर्वतः



© NCERT not to be republished



Reprint 2025-26



## योग्यताविस्तरः

### कुरु उपकारं, कुरु उद्धारम्

मा कुरु दर्पं, मा कुरु गर्वं मा भव मानी, मानय सर्वम्।
मा भज दैन्यं, मा भज शोकं मुदितमना भव, मोदय लोकम्॥

तनयं पाठय, तनयां पाठय शिक्षय सुगुणं, दुर्गुणं वारय।
कुरु उपकारं, कुरु उद्धारम् अपनय भारं, त्यज अपकारम्॥

मा वद मिथ्या, मा वद व्यर्थं न चल कुमार्गे, न कुरु अनर्थम्।
पाहि अनाथं, पालय दीनं लालय जननी-जनक-विहीनम्॥

मा पिब मादकवस्तु अपेयम् मा भज दुर्व्यसनं परिहेयम्।
मा नय क्षणमपि व्यर्थं समयं कुरु सकलं निजकार्यं सभयम्॥

*वासुदेवद्विवेदी शास्त्री*

(एतत् गीतं कण्ठस्थीकुरुत, समूहरूपेण गायत लोट्लकाररूपाणि च अवलोकयत।)

**लोट्लकारस्य क्रियापदे अधोलिखितानि चिह्नानि भवन्ति।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अतु | अताम् | अन्तु |
| मध्यमपुरुषः | अ | अतम् | अत |
| उत्तमपुरुषः | आनि | आव | आम |



## परियोजनाकार्यम्

१. पुस्तकात् लोट्लकारस्य क्रियापदानि चित्वा लिखन्तु।

२. गृहे माता भवन्तं/भवतीं "किं किम् आदिशति" इति लोट्लकारे पञ्च वाक्यानि लिखन्तु।



© NCERT not to be republished



Reprint 2025-26